# Shri Anantanandacharyapranitah Sadvidyarthanirnayah

# શ્રીઅનન્તાનન્દાચાર્યપ્રણીતઃ સદ્વિદ્યાર્થનિર્ણયઃ

## Document Information

Text title : Shri Anantanandacharyapranitah Sadvidyarthanirnayah

File name : sadvidyArthanirNayaH.itx

Category : misc, rAmAnanda, advice, upadesha

Location : doc_z_misc_general

Author : anantAnandAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampraday Dig-Darshan

Latest update : November 11, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 11, 2023

*sanskritdocuments.org*

Shri Anantanandacharyapranitah Sadvidyarthanirnayah

# શ્રીઅનન્તાનન્દાચાર્યપ્રણીતઃ સદ્વિદ્યાર્થનિર્ણયઃ

વેદકૃદ્ રાઘવં બ્રહ્મ સૂત્રકૃદ્બાદરાયણમ્ ।
બોધાયનં ચ વન્દેઽહં વૃત્તિકૃત્પુરુષોત્તમમ્ ॥ ૧॥

આનન્દભાષ્યકૃદ્રામાનન્દાચાર્યં પ્રણમ્ય ચ ।
મોદાય વિદુષાં કુર્વે સદ્વિદ્યાર્થસ્ય નિર્ણયમ્ ॥ ૨॥

ઉપક્રમોપસંહારાવભ્યાસોઽપૂર્વતાફલમ્ ।
અર્થવાદોપપત્તી ચ લિઙ્ગં તાત્પર્યનિર્ણયે ॥ ૩॥

અર્થનિર્ણાયકાનીતિ લિઙ્ગાનિ ષડ્વિધાનિ હિ ।
કુર્વન્તિ તાનિ નિર્દોષં સદ્વિદ્યાર્થીવિનિર્ણયમ્ ॥ ૪॥

બ્રહ્મ ચ સવિશેષં હિ સદ્વિદ્યાવિષયો મતઃ ।
ઉપક્રમે “સદેવેતિ” શ્રુત્યા યદ્ બ્રહ્મ બોધિતમ્ ॥ ૫॥

ઉપાદાનં નિમિત્તં ચ કારણં દ્વિવિધં ખલુ ।
તતશ્ચ સર્વશક્તિત્વં સર્વજ્ઞત્વં ચ તત્ર હિ ॥ ૬॥

સવિશેષં તથા બ્રહ્મોપસંહારેઽપિ બોધ્યતે ।
તત્પદત્વમ્પદાભ્યાં ચ સામાનાધિકરણ્યતઃ ॥ ૭॥

યતસ્તત્પદતશ્ચાત્ર પરં બ્રહ્મૈવ બોધ્યતે ।
જ્ઞાપ્યતે ત્વદ્વપુષ્કં હિ બ્રહ્મ ત્વમ્પદતસ્તથા ॥ ૮॥

પ્રકારિણોસ્તતશ્ચૈક્યં બ્રહ્મણોરત્ર સમ્મતમ્ ।
જીવાત્મબ્રહ્મણોર્નૈક્યં દેહદેહિસ્વરૂપયોઃ ॥ ૯॥

સામાનાધિકરણ્યં ન યદ્યેકવાચિતા ન હિ ।
જઘન્યા લક્ષણા બોધ્યા શક્તિતો બોધસમ્ભવે ॥ ૧૦॥

તત્ત્વમસીતિવાક્યસ્ય નવવારપ્રયોગતઃ ।
અભ્યાસોઽપિ વદત્યત્ર બ્રહ્મણઃ સવિશેષતામ્ ॥ ૧૧॥

વર્ત્તતેઽપૂર્વતા ચાત્ર યતઃ શ્રુત્યૈવ નિશ્ચિતા ।
હેતુતા જગતો રામે સકલાન્તર્નિયન્તૃતા ॥ ૧૨॥

“યાવન્ન વિમોક્ષ્યે” શ્રુત્યાઃ “સમ્પત્સ્યે” ઇતિ શબ્દતઃ ।
ફલેઽપિ પ્રાપ્યત્વોક્તેશ્ચ બ્રહ્મણઃ સવિશેષતા ॥ ૧૩॥

તદર્થે ચાર્થવાદોઽપિ સદ્વિદ્યાયાં ચ વિદ્યતે ।
કથિતા હિ કથા યસ્માત્ પિતૃપુત્રોક્તિલક્ષણા ॥ ૧૪॥

મૃત્પિણ્ડાદય ઉક્તા હિ દૃષ્ટાન્તાશ્ચ ત્રયસ્તતઃ ।
ઉપપત્તિસ્તદર્થે ચ સદ્વિદ્યાયાં હિ વર્ત્તતે ॥ ૧૫॥

રામાનન્દાર્યશિષ્ય શ્રીઅનન્તાનન્દનિર્મિતઃ ।
સદ્વિદ્યાર્થપ્રદો ભૂયાત્ સદ્વિદ્યાર્થસ્ય નિર્ણયઃ ॥ ૧૬॥

ઇતિ શ્રીઅનન્તાનન્દાચાર્યપ્રણીતઃ સદ્વિદ્યાર્થનિર્ણયઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Anantanandacharyapranitah Sadvidyarthanirnayah*
pdf was typeset on November 11, 2023

Please send corrections to *sanskrit@cheerful.com*